# REET 2015 Level-I

## भाषा – I : संस्कृतम्

**अत्र त्रिंशत् प्रश्नानि सन्ति। सर्वे प्रश्ना: समाधेया:।**

**31. शिक्षणमूल्यांकनस्य कति भेदा: सन्ति?**

(अ) त्रय: (ब) पञ्च

(स) चत्वार: (द) षष्ट् (अ)

**32. अनुवादशिक्षणस्योद्देश्यमस्ति–**

(अ) छात्रेषु संस्कृतलेखनस्य योग्यतोत्पादनम्।

(ब) छात्राणां शब्दभण्डारस्य अभिवर्धनम्।

(स) शब्दकोषस्य वृद्धि: भवति।

(द) सर्वमपि। (द)

**33. उपचारात्मकं शिक्षणं भवति–**

(अ) छात्राणाम् त्रुटिनिवारणार्थम्

(ब) पठनस्य अभ्यास:

(स) लेखनकलासु निपुणता

(द) सर्वमपि (ब)

**34. चतुर्विधभाषाकौशलानाम् क्रमनिर्धारणम् अस्ति–**

(अ) श्रवणं, भाषणं, पठनम्, लेखनम्।

(ब) भाषणं, लेखनं, पठनम्, श्रवणम्।

(स) पठनम्, भाषणम्, श्रवणम्, लेखनम्।

(द) लेखनम्, पठनम्, भाषाणम्, श्रवणम्। (अ)



www.gkabhi.in

**35. संस्कृतमूल्यांकनस्य हेतोः प्रश्नाः भवेयुः–**

(अ) निबन्धनात्मकाः (ब) लघूत्तरात्मकाः

(स) अतिलघूत्तरात्मकाः (द) समन्विताः (ब)

**36. कः प्रयोगः शुद्धः?**

(अ) अलं हसिताय (ब) अलं हसितेन

(स) अलं हसितः (द) अलं हासितस्य (अ)

**37. 'मनोरथः' इत्यत्र सन्धिविच्छेदः कः अस्ति?**

(अ) मन + रथः (ब) मनु + रथः

(स) मनस् + रथ (द) मनो + रथः (द)

**38. शुद्धं पदम् अस्ति–**

(अ) अन्तर्राष्ट्रियम् (ब) अन्तराष्ट्रीयम्

(स) आन्ताराष्ट्रयीयम् (द) अन्ताराष्ट्रियम् (द)

**39. लेखनकलायाः अत्यधिकं महत्त्वं वर्तते–**

(अ) मञ्चेषु (ब) नाट्यस्थलेषु

(स) गृहेषु (द) विद्यालेषु (द)

**निम्नलिखितम् अपठितं गद्यांश आधारीकृत्य निम्नलिखितव्याकरण-सम्बन्धितः प्रश्नाः (40-44) समाधेयाः–**

संस्कृतभाषा जगतः सर्वासु भाषासु प्राचीनतमा, सर्वोत्कृष्टसाहित्यसंयुक्ता च वर्तते। अनन्तानन्तवर्षेषु व्यपगतेष्वपि अस्याः माधुर्यम् उदारत्वं च नाद्यापि विकृतम्। पाश्चात्यदेशीय विचारशीलाः कोल्हार्न-मैक्समूलर-मैकडानाल्ड- कीथादयः विद्वांसः, संस्कृतभाषायाः प्रशंसामकुर्वन्। सर्वासामार्यभाषाणाम् उत्पत्तिः अत एवं बभूव। पुरा सर्वे जनाः संस्कृतभाषायैवाभाषन्त। अतः सर्वमपि प्राक्तनं साहित्यं संस्कृतभाषायामेव उपलभ्यते। सर्वे प्राचीनतमाः ग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। वेदेषु मानवकर्तव्याकर्तव्ययोः सम्यक् निर्धारणमस्ति। संस्कृतसाहित्यं भारतस्य गौरवं उद्घोषयति। समस्तं देशं च एकतासूत्रे बध्नाति। अस्य साहित्यस्य प्रचारः प्रसारश्च नितान्तं लाभप्रदःएतज्ज्ञानविहिनस्तु पशुरेव।

**40. 'जगत:' इत्यत्र का विभक्ति:?**

(अ) प्रथमा (ब) षष्ठी

(स) सप्तमी (द) तृतीया (ब)

**41. 'व्यपगतेष्वपि' इत्यत्र क: सन्धि:?**

(अ) यण्सन्धि: (ब) विसर्गसन्धि:

(स) वृद्धिसन्धि: (द) पररूपसन्धि: (अ)

**42. 'विकृतम्' इत्यत्र क: प्रत्यय?**

(अ) कतवतु (ब) क्त्वा

(स) कत (द) ण्वुल् (स)

**43. संस्कृतभाषायां कति वेदा: सन्ति?**

(अ) सप्त (ब) पञ्च

(स) दश (द) चत्वार: (द)

**44. 'एकतासूत्र' इत्यत्र समासाविग्रह: क: अस्ति?**

(अ) एकताया: सूत्रे (ब) एकता सूत्रे

(स) एकताम् सूत्रे (द) एकस्मिन् सूत्रे (अ)

**अधोलिखितं गद्यांशं आधारीकृत्य निम्नलिखिता: प्रश्ना: (45-49) समाधेया–**

भारतवर्षे एक: महान् देश: वर्तते। अस्मिन् अनेके प्रदेशा: सन्ति। तेषु राजस्थानप्रदेशोऽपि एक: वर्तते। अयं प्रदेश: मूलत: विविधराज्ञां स्थली वर्तते। स्वतंत्रताप्राप्तिपश्चात् तेषां एकीकरणम् अभवत्। अस्मिन् एकीकरणे पटेल महोदयस्य महत्वपर्णभूमिका आसीत्। साम्प्रतं राजस्थानप्रदेश: एकं राज्यं वर्तते। अस्य राजधानी जयपुरम् अस्ति। राजस्थान-प्रदेशस्य काश्चन एतादृश्य: विशेषता: सन्ति या खलु अन्यत्र न लभन्ते। अस्य प्रदेशस्य भूमि: वीराणां वीरांगनानां च जननी वर्तते। साम्प्रतं शिक्षाक्षेत्रे राजस्थानप्रदेश: उन्नतिपथमारूढो वर्तते। अत्र छात्राणां कृते उच्च शिक्षाया: उत्तमा व्यवस्था वर्तते।अत्र अनेकानि रमणीयानि स्थानानि वर्तन्ते। अस्य प्रदेशस्य भाषा राजस्थानी वर्तते। अत्रत्यां संस्कृति: सर्वत्र प्रसिद्धा।

**45. 'राज्ञाम्' इत्यत्र का विभक्ति: अस्ति?**

(अ) सप्तमी बहुवचनम् (ब) षष्ठी बहुवचनम्

(स) पञ्चमी बहुवचनम् (द) चतुर्थी बहुवचनम् (ब)

**46. 'अभवत्' इति पदं कस्मिन् लकारे प्रयुक्तमस्ति?**

(अ) लट्लकारे (ब) लोट लकारे

(स) लङ् लकारे (द) विधिलिङ्लकारे (स)

**47. 'वीराणाम्' इत्यस्य विलोमशब्द: क: अस्ति?**

(अ) वीरांगनानाम् (ब) वीरान्

(स) वीराणि (द) वीरेषु (अ)

**48. 'छात्राणां कृते' इति पदस्य पर्याय: अस्ति?**

(अ) छात्रेषु (ब) छात्राय

(स) छात्रेण (द) छात्रान् (*)

**49. 'अत्र अनेकानि रमणीयानि स्थानानि वर्तन्ते' वाक्यस्य लोट्लकारे परिवर्तितम् रूपम् अस्ति?**

(अ) अत्र अनेकानि रमणीयानि स्थानानि सन्ति।

(ब) अत्र अनेकानि रमणीयानि स्थानानि आसीत्।

(स) अत्र अनेकानि रमणीयानि स्थानानि वर्तन्ताम्।

(द) अत्र अनेकानि रमणीयानि स्थानानि भविष्यन्ति। (स)

**50. हरि वैकुण्ठ में रहते हैं।– संस्कृते अनुवादं कुरुत–**

(अ) हरि वैकुण्ठम् अधिवसति। (ब) हरि: वैकुण्ठम् वसति।

(स) हरि: वैकुण्ठे अधिवसति। (द) हरि वैकुण्ठे उपवसति। (अ)

**51. स: पत्रम् लिखति। वाक्यस्यास्य वाच्यपरिवर्तनं कुरुत–**

(अ) स: पत्रेण लिखति। (ब) तेन पत्रम् लिख्यते।

(स) तेन पत्रम् लिखति। (द) स: पत्रम् लिख्यते। (अ)

**52. निम्नांकितेषु शुद्धं वाक्यम् अस्ति:–**

(अ) स: ईश्वरं नमति। (ब) स: ईश्वरस्य नमस्करोति।

(स) स: ईश्वर: नमस्कोति। (द) स: ईश्वरेण नमस्करोति। (अ)

**53. निम्नसूक्ते: मूलरुपस्ति:–**

(अ) अहितं मनोहरि च सुलभं वच:।

(ब) हितं मनोहारि च सुलभं वच:।

(स) हितं अमनोहारि च सुलभं वच:।

(द) हितं मनोहारि च दुर्लभं वच:। (द)

**54. 'बलि से पृथिवी मांगता है' वाक्यस्य अनुवाद अस्ति–**

(अ) बले: वसुधां याचति। (ब) बलि याचते वसुधाम्।

(स) बलि याचते वसुधा। (द) बलिना याचते वसुधा। (ब)

**55. संस्कृतभाषाशिक्षणस्य प्रथमं कौशलं विद्यते–**

(अ) श्रवणनम् (ब) पठनम्

(स) सम्भाषाणम् (द) लेखनम् (अ)

**56. नाटकपाठयोजनायाम् शिक्षक: रंगमचे कारयति–**

(अ) पाठनम् (ब) अभिनयम्

(स) लेखनम् (द) वाचनम् (ब)

**57. 'अभिज्ञानशाकुन्तलम्' किम् अस्ति?**

(अ) नाटकम् (ब) महाकाव्यम्

(स) खण्डकाव्यम् (द) कथा (अ)

**58. कथाश्रवणे अनावश्यकम् वर्तते–**

(अ) कथाश्रवणम् (ब) सरलभाषा

(स) कथाया: मुख्यविशेषता (द) पुस्तकस्य प्रयोग: (द)

**59. निम्नांकितेषु शब्देषु उपसर्गरहित: शब्द, अस्ति–**

(अ) अनुराग: (ब) पराग:

(स) विराग: (द) संलाप: (अ)

**60. संस्कृतशिक्षणाप्राचीनपद्धते, मुख्योद्देश्यमस्ति–**

(अ) भारतीयसंस्कृते: परिचय:।

(ब) स्वाध्यायं प्रति छात्राणां अभिरूच्युत्पादनम्।

(स) शुद्धोच्चारणस्य सामर्थ्यप्रदानम्।

(द) सर्वे (द)

❑❑❑

For Indian GK, Rajasthan GK, Subjective Knowledge Educational Psychology, Sanskrit, Hindi etc.

Follow Website → www.gkabhi.in

Subcribe Youtube → www.youtube.com/ekanshstudy

Subcribe Youtube → https://www.youtube.com/c/GKAbhi